## सक्थ चाक्रान्तात् । (१९८/३९३२)

सक्थम् इति कृतसमासान्तः सक्थिशब्दोऽत्र गृह्यते[1] । सः अक्रान्तात् परो विभाषा अन्तोदात्तो भवति[2] । गौरसक्थः, गौरसक्थः । [3]श्लक्षणसक्थः, श्लक्षणसक्थः[4] । अक्रान्तात् इति किम् ? चक्रसक्थः । षचश्चित्वात् नित्यमन्तोदात्तत्वं भवति ॥

## परादिश्छन्दसि बहुलम् । (१९९/३९३३)

छन्दसि विषये [5]परादिः उदात्तो भवति बहुलम्[6] । परशब्देनात्र सक्थशब्द एव गृह्यते । अञ्जिसक्थमालभेत । 'त्वाष्ट्रौ लोमशसक्थौ' (तै.सं. ५.५.२३.१) । ऋजुबाहुः । वाक्पतिः । चित्पतिः ॥

परादिश्च परान्तश्च पूर्वान्तश्चापि दृश्यते ।
पूर्वादयश्च दृश्यन्ते व्यत्ययो बहुलं [7]स्मृतः ॥ (म.भा. ३.१४०)

परादिरुदाहृतः । परान्तश्च --

[७१३] अन्तोदात्तप्रकरणे त्रिचक्रादीनां छन्दस्युपसङ्ख्यानम् । (म.भा. ३.१४०)

'त्रिबन्धुरेण त्रिवृता रथेन त्रिचक्रेण' (ऋ. १.११८.२) । पूर्वान्तः --

[७१४] पूर्वपदान्तोदात्तप्रकरणे मरुद्वृद्धादीनां छन्दस्युपसङ्ख्यानम् ।

मरुद्वृद्धः । पूर्वादिः --

[७१५] पूर्वपदाद्युदात्तप्रकरणे दिवोदासादीनां छन्दस्युपसङ्ख्यानम् ।

दिवोदासाय समगाय ते इत्येवमादि सर्वं सङ्गृहीतं भवति ॥

इति[7] काशिकायां वृत्तौ [8]षष्ठाध्यायस्य

द्वितीयः पादः[9] ॥

----(०)----

1. बहुव्रीहौ समासे इत्यधिकम् ब. 2. बहुव्रीहौ इत्यधिकम् फ. 3. कृष्णसक्थः ह. 4. पृश्निसक्थमालभेत इत्यधिकम् ड. 5. परस्यादिः फ. 6. बहुलग्रहणमन्यत्रापि यथा स्यात् इत्यधिकम् फ. 7. ततः मुद्रितः पाठः 8. श्रीवामन इत्यधिकम् ड. 9. षष्ठस्याध्यायस्य क. 10. पूर्णत्रयीश्वरो रक्षतु इत्यधिकम ह.